साध्यत्वात् "अत्यादयः क्रान्ताद्यर्थे द्वितीययेति" स० । द्वादशरात्रसाध्ये प्रायश्चित्तरूपे व्रतभेदे "एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्व्ववत् । त्र्यहञ्चोपवसेदन्त्य मतिकृच्छ्रं चरन् द्विजः इति" मनुः । "त्र्यहाणि त्रीणि नवाहानि पूर्व्ववत् प्रातःसायमयाचितैः प्राजापत्यवदिति" रघुनन्दनः । प्रजापत्ये हि "त्र्यहं प्रातस्त्र्यहं सायं, त्र्यहमद्यादयाचितमिति" मनुनैव प्रातःकालादौ भक्षणमुक्तं पूर्व्ववदित्यनेन तद्धर्म्मातिदेशः । अस्य पुंलिङ्गत्वमपि "अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रातिकृच्छ्रक" इति विश्वामित्रवचने पुंस्त्वनिर्द्देशात् । "अव्रगुर्य्यं चरेत् कृच्छ्रमतिकृच्छ्रं निपातने इति" मनुः । अतिशयितं कृच्छ्रं प्रा० स० । अतिकष्टे । तद्वति त्रि० ।

**अतिकृत** त्रि० मर्य्यादातिक्रमेण कृतम् । मर्य्यादातिक्रमेण कृते पदार्थे "सर्व्वत्रातिकृतं लोके व्यसनायोपकल्पते" इति पुरा० ।

**अतिकृति** स्त्री अति+कृ-क्तिन् । मर्य्यातिक्रमेण करणे । अत्या०स० । वृत्तरत्नाकरोक्ते "तथातिकृतिरुत्कृतिरिति" पञ्चविंशत्यक्षरपादके वर्णवृत्तभेदे ।

**अतिकेशर** पु० अतिरिक्तानि केशराण्यस्य ब० । कुब्जकवृक्षे ।

**अतिक्रम** पु० अति—क्रम—घञ् ह्रस्वः । उल्लङ्घने । अतिक्रान्तः क्रममिति अत्या०स० । लङ्घितक्रमे त्रि० । दुर्+अति+क्रम—कर्म्मणि खल् । दुःखेनातिक्रमणीये त्रि० । "कालो हि दुरतिक्रम" इति "स्वभावो दुरतिक्रम" इति च पुरा० । भावे ल्युट् । अतिक्रमणम् अत्रैव न० । भावे क्तिन् । अतिक्रान्तिरत्रार्थे स्त्री ।

**अतिक्रुद्ध** पु० प्रा०स० । "अष्टाविंशत्यक्षरोय एकत्रिंशदथापि वा । अतिक्रुद्धः स विज्ञेयो निन्दितः सर्व्वकर्म्मसु इति" तन्त्रोक्तमन्त्रभेदे । अतिकोपान्विते त्रि० ।

**अतिक्रूर** पु० प्रा०स० । "क्रूरा वक्रा अतिक्रूरा" इति ज्योतिषपरिभाषिते" वक्रगत्यापन्ने भौमशनिरूपक्रूरग्रहे । अत्यन्तक्रूरे त्रि० । "त्रिंशदक्षरको मन्त्रस्त्रयस्त्रिंशदथापि वा । अतिक्रूरः स विज्ञेयो निन्दितः सर्व्वकर्म्मसु" इति तन्त्रोक्तमन्त्रभेदे पु० ।

**अतिगण्ड** पु० अत्या०स० "अतिगण्डः सुकर्म्मा चेति" ज्योतिषपरिभाषिते विष्कुम्भावधि षष्ठे योगे । "गण्डातिगण्डयोर्नाडीपञ्चकं परिवर्ज्जयेदिति" ज्यो० अतिवृद्धोगण्डोगलः । वृद्धगण्डे पु० । प्रा० ब० । अतिवृद्धगण्डवति त्रि० ।

**अतिगन्ध** पु० अतिशयितो गन्धो यस्य ब० । चम्पकवृक्षे । अतिशयितगन्धवति त्रि० । [याम् राजनिघ० ।

**अतिगन्धालु** पु० अतिगन्ध+मत्वर्थे आलुच् । पुत्रदात्रीलता

**अतिगर्वित** त्रि० अत्यन्तं गर्वितः । अत्यन्तगर्व्वयुक्ते अत्यभिमानिनि गर्वश्च आत्मनि असतो गुणादेरुत्कर्षाभिमानः तस्यात्यन्तत्वमन्यस्मिन् अपकर्षज्ञानपूर्व्वकत्वम् ।

**अतिगव** त्रि० अतिक्रान्तो गां बुद्ध्या षच्समा० । अत्यन्तमूर्खे, अतिक्रान्तः गां वाचम् । वाक्पथातीते अवर्णनीये च त्रि० ।

**अतिगह्वर** त्रि० अतिक्रान्तो गह्वरं दुर्बोधत्वेन प्रवेशायोग्यत्वात् अत्या० स० । दुर्बोधे अतिगहने ।

**अतिगुण** पु० अतिशयितो गुणः । अतिशयविनयदाक्षिण्यादौ । अतिक्रान्तो गुणम् । गुणहीने त्रि० । अतिशयितो गुणोऽस्य प्रा०ब० । उत्कृष्टगुणवति त्रि० ।

**अतिगुरु** पु० अतिशयितो गुरुः पूज्यतमत्वात् प्रा० स० । "त्रयः पुरुषस्यातिगुरवो भवन्ति पिता माताचार्य्यश्चेति" विष्णूक्ते पित्रादौ । अत्यन्तगुरुत्ववति पारदादौ द्रव्ये त्रि० । स्त्रियां वा ङीप् । अतिगुर्वी । [पर्ण्याम् ।

**अतिगुहा** स्त्री अतिक्रान्तो गुहां मध्यावकाशेन । पृश्नि-

**अतिग्रह** त्रि० अतिशयितः ग्रहो ज्ञानं, स्वस्वकार्य्यस्य ग्रहणं वा येषाम् । स्वस्वविषयग्राहकेषु नेत्रादिषु ज्ञानेन्द्रियेषु, आदानादिस्वस्वकार्य्यकारकेषु वागादिषु कर्म्मेन्द्रियेषु च । अतिक्रान्तो ग्रहम् । अत्यन्तदुर्बोधे त्रि० । अतिशयितो ग्रहो ज्ञानम् । सर्व्वथा समग्रज्ञाने पु० । अतिग्रहणादयोऽप्युक्तार्थेषु । [सन्निभे सुखावस्थाभेदे ।

**अतिघ्नी** स्त्री अतिशयेन हन्ति दुःखं हन-टक् । दुःखा-

**अतिचरा** स्त्री अतिक्रम्य स्वस्थानं सरोऽन्तरं चरति गच्छति चर-अच् । पद्मिन्याम्, तत्तुल्याकारवत्त्वात् स्थलपद्मिन्यां, पद्मचारिण्यां लतायाञ्च । अतिक्रमणकारिणि त्रि० ।

**अतिचारः** पु० अतिक्रम्य स्वस्वभोगकालमुल्लङ्घ्य चारः राश्यन्तरगमनम् । ज्योतिषोक्ते भौमादिपञ्चकस्य स्वस्वाक्रान्तराशिषु भोगकालमुल्लङ्घ्य राश्यन्तरगमने । अतिचारश्च ग्रहगतिशब्दे वक्ष्यमाणेन "रविर्मासं निशानाथः सपादंदिवसद्वय" मित्यादिनोक्तभोगकालभेदोल्लङ्घनेन ग्रहाणां अतिशीघ्रगतया अल्पकालेनैव आक्रान्तराशिमुपभुज्य राश्यन्तरगमनम् । तच्च विस्तरेण ग्रहगतिशब्दे वक्ष्यते । "यदातिचारं सुरराजमन्त्रीति" "अतिचारं गते जीवे" इति "गोऽजालिकुम्भेतरगोऽतिचारम" इति च ज्योतिषम् । गुरोरतिचारे कालाशुद्धिश्च अकालशब्दे दर्शिता । अतिक्रम्य गमने च ।